त्र्यहमासत्र्यहार्द्धमासिकम् । बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्” या० स्मृ० । तथाच बीजे—व्रीह्यादौ पञ्चाहं, रत्ने—मुक्ताप्रवालादौ सप्ताहं, स्त्रियां—दास्यां मासं, दोह्ये—गोमहिष्यादौ त्र्यहम्, पुंसि—दासे पञ्चदशाहं, व्याप्य परीक्षणं कर्त्तव्यम् तावत्कालमध्ये अनुशये प्रत्याहर्त्तुं शक्यते इत्यवगम्यते एवञ्च मनुवचनमेतदतिरिक्तविषयम् एवं विक्रयस्यानुशयकालविशेषोद्रव्यविशेषे बोध्यः ।

**अविक्रेय** त्रि० विक्रेतुमनर्हः । स्मृतिनिषिद्धविक्रये लाक्षालवणादौ अपण्यशब्दे विवृतिः । “अविक्रेयस्य विक्रयः” स्मृतिः ।

**अविक्षत** विक्षतः नष्टः भोगादिना दुष्टोवा न०त० । १अविनष्टे भोगादिना २अदूषिते च । “विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतम्” स्मृतिः ।

**अविक्षित** त्रि० नास्ति विशेषेण क्षितम् क्षयोऽस्य भावे क्त । विशेषक्षयशून्ये “अविक्षितास आयुषा सुवीराः” ऋ० ७, १२२४ । वा दीर्घनत्वे । अविक्षीणः तत्रैव कर्त्तरि क्त न०त० । अविक्षीण इत्येव ।

**अविक्षिप** त्रि० विक्षेप्तुं न शक्तः क्षिप-क— । विक्षेप्तुमशक्ते । स्वार्थे कन् तत्रैव । [अजगन्धाद्वृक्षे ।

**अविगन्धा** स्त्री अवेश्छागस्य गन्ध इव गन्धः पुष्पादावस्याः ।

**अविगर्हित** त्रि० न०त० । १अनिन्दिते

**अविगीत** त्रि० न०त० । अवनिन्दिते “अविगीतशिष्टाचारपरम्पराप्राप्तत्वेनेति” मुक्ता० । [२उद्विग्नभिन्ने त्रि० ।

**अविग्न** पु० विज—क्त न०त० । (करमचा) १करमर्द्दकवृक्षे ।

**अविग्रह** त्रि०नास्ति विशेषेण ग्रहो यस्य । १विशेषरूपेणाज्ञाते “अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः” हरिः । न विग्रहो वृत्तिसमानार्थकं वाक्यं यस्य । २व्याकरणोक्ते नित्यसमासे । नास्ति विग्रहो देहो यस्य । ३निरवयवे परमेशे पु० नास्ति मीमांसकोक्ते ४विग्रहशून्ये देवे च । तैर्हि देवानां विग्रहवत्त्वं खण्डितं तच्च शङ्कापूर्व्वकं जै०सू० भाष्ये च दर्शितं यथा—“देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्” सू० “नैतदस्ति,—अग्न्यादयोऽप्रयोजकाः—इति, सर्व्वा देवताः सर्व्वेषां धर्म्माणां प्रयोजिकाः भवितुमर्हन्ति । कुतः ? । ‘भोजनस्य तदर्थत्वात्’,—भोजनं हि इदं देवतायाः, यागो नाम, भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यते—इति, देवतासम्प्रदानको हि अयं यागः श्रूयते, सम्प्रदानं च नाम कर्म्मणोऽपि ईप्सिततमादभिप्रेततरम्, तस्मात् न गुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्म्मणी । अपि च यागो नाम देवतापूजा, पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते, तदेतत् ‘अतिथिवत्’ द्रष्टव्यं, यथा यावत्किञ्चित् अतिथेः परिचरणं, सर्व्वं तत् अतिथिप्रयुक्तम् एवम् इदमपि—इति । आह,—“ननु एवं ब्रुवता, विग्रहवती देवता भुङ्क्ते च—इत्यभ्युपगतं भवति” । उच्यते, वाढं, विग्रहवती देवता भुङ्क्ते च । कुतः ? । स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च,—एवं हि स्मरन्ति, विग्रहवती देवता—इति, स्मृतिश्च नः प्रमाणम् । तथा विग्रहवतीं देवताम् उपचरन्ति,—यमं दण्डहस्तमालिखन्ति, कथयन्ति च, तथा वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तं, उपचारादपि स्मृतेर्दृढिमानं कल्पयामः । तथा अन्यार्थवचनं, विग्रहवतीं देवतां दर्शयति,—“जगृभ्मा ते दक्षिणम् इन्द्र ! हस्तम्”—इति, पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति । तथा “इमे चित् इन्द्र ! रोदसी अपारे यत् संगृभ्णा मघवन् ! काशिरित्ते,—इति, काशिर्मुष्टिः, सोऽपि पुरुषविग्रहस्य एव उपपद्यते । तथा, “तुविग्रीवो वयोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते” इति, ग्रीवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति । तस्मात् विग्रहवती देवता इति । भुङ्क्ते च । कथम् अवगम्यते ? । स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं स्मरन्ति, भुङ्क्ते देवता इति । तथा च एनाम् भुञ्जानाम् इव उपचरन्ति, यदस्यै विविधान् उपचारान् उपहरन्ति । तथा च अन्यार्थवचनं भुञ्जानाम् देवतां गमयति,—“अद्धीन्द्र ! पिब च प्रस्थितस्य’—इति, तथा च, “विश्वासनानि जठरेषु धत्ते” इति, ‘एकया प्रति धा पिबत्साकं सरांसि त्रिंशतम्” इति । आह, “न देवता भुङ्क्ते, यदि च भुञ्जीत देवतायै हविः प्रत्तं क्षीयेत” । उच्यते, अन्नरसभोजिनी देवता मधुकरीवत् अवगम्यते । कथम्? । देवतायै हविः प्रत्तं नीरसं भवति, तस्मात् अन्नरसं भुङ्क्ते देवता इति गम्यते” भा० । “आर्थपत्याच्च” सू० । “यदि कस्यचित् अर्थस्य ईशाना देवता उपचर्यमाणा च प्रसीदेत् ततः तदाराधनार्थम् इयं देवतापूजा अभिनिर्वर्त्तेत, न च एतदुभयम् अपि अस्ति इति, तत् उच्यते, अर्थपतिर्द्देवता इति । कथम् अवगम्यते? । स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं हि स्मरन्ति, अर्थानाम् ईष्टे देवता इति । तथा, देवग्रामो देवक्षेत्रम् इत्युपचारस्तामेव स्मृतिं दृढयति । तथा अन्यार्थवचनम् ईशानां देवतां दर्शयति, “इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानां, इन्द्रो वृधाम् इन्द्र इन्मेधिराणाम् इन्द्रः